# Shrimad Anjaneya BhujangaprayAta stotram

# શ્રીમદાઞ્જનેયભુજઙ્ગપ્રયાતસ્તોત્રમ્

## Document Information

Text title : Anjaneya Bhujangaprayata stotram

File name : Anjaneyabhujangam.itx

Category : hanumaana, puShpAshrIvatsan, bhujanga

Location : doc_hanumaana

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : September 5, 2019

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

February 11, 2023

*sanskritdocuments.org*

# શ્રીમદાઞ્જનેયભુજઙ્ગપ્રયાતસ્તોત્રમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ આઞ્જનેયાય વિદ્મહે । રામદૂતાય ધીમહિ ।
તન્નો યજઃ પ્રચોદયાત્ ॥

સદારામભક્તિપ્રસારપ્રઙીનં સદાતારકાનન્દનામોપગઙ્ગમ્ ।
સદાધ્યાનલીનં સદાનામગાનં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧॥

સદારામનામપ્લવાહ્લાદરૂપં સદારામનામાધરસ્મેરવક્ત્રમ્ ।
સદારામગાનાતિમાધુર્યકણ્ઠં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૨॥

સદાનામયોગં સદારામરાગં સદાચિત્તસમ્પૂર્ણનામપ્રભાવમ્ ।
સદાબ્રહ્મનિષ્ઠં વરજ્ઞાનપૂર્ણં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૩॥

સદારામદાસં મહાવીરવર્યં સદાનામપેયૂષપાનપ્રમત્તમ્ ।
સુનામપ્રહૃષ્ટં સભક્તાગ્રગણ્યં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૪॥

સુનામસ્વરાલાપબાષ્પાકુલાક્ષં સુસઙ્ગીતનામપ્રભાવસ્વભાવમ્ ।
સ્વરસ્વાદુનામોપભોગ્યં સુભાગ્યં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૫॥

સસૂર્યપ્રકાશં સસત્ત્વપ્રવાચં અસાધ્યપ્રભાવં સુસાધ્યપ્રમાણમ્ ।
સદાધ્યાતરામસ્વરૂપપ્રકાશં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૬॥

સસત્ત્વં ફલાશં સુમેધાવિલાસં સુસીતામનશ્શોકનાશં પ્રશાન્તમ્ ।
સુવેગં યજં તં ભજે રામદૂતં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૭॥

મહદ્બ્રહ્મચર્યં મનોવાક્સ્થિરામં મનસ્કાયસઞ્જીવનૌષધ્યધેયમ્ ।
મહીધારકન્ધારધારપ્રતાપં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૮॥

સસીતસ્વરારામનામપ્રગેયં સસઙ્ગીતસાહિત્યવિદ્યાપ્રવીણમ્ ।

સુસમસ્વરાનન્દનૃત્યાભિલાસ્યં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૯॥

હરિશ્રેષ્ઠરત્નં હરિપ્રેષ્ઠભક્તં હરિસ્મેરહૃત્પદ્મવાસાનુરાગમ્ ।
હરપ્રીતનામપ્રિયં ભક્તવર્યં હરાંશં હનૂમન્તશૂરં નમામિ ॥ ૧૦॥

હિમાગપ્રશાન્તિસ્વમાધુર્યગાયં હિમાનન્દગઙ્ગાપ્લવાહ્લાદગેયમ્ ।
હિમાપૂતરમ્યાષ્ટ્રધ્યાનસ્થદેવં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૧॥

મનોગાલનાગીતરામાભિરામં સુરાગાનુરાગં સુનામાભિજપ્યમ્ ।
મનોજસ્વરાગીતસીતાવરાપ્તં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૨॥

વરાનન્દરામસ્વવાચાભિનન્દં સરાગપ્રભાષં સ્વરારામરામમ્ ।
કુરોગપ્રણાશં વરારોગ્યદાયં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૩॥

સુસત્કાર્યસિદ્ધિં સુસદ્ભક્તિબુદ્ધિં વિરાગત્વવૃદ્ધિં સુરાગપ્રવૃદ્ધિમ્ ।
સુનાદપ્રવૃત્તિં સુબોધં સુશક્તિં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૪॥

સુસઙ્ગીતવાણિં સુસત્પુષ્પપાણિં કવિસ્ફૂર્તિરક્તિં કપિં રાગહૃષ્ટિમ્ ।
સદાસત્ત્વદૃષ્ટિં સદાસક્તિપુષ્ટિં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૫॥

ગુરુત્યાગરાજેન્દ્રસદ્ગાનલોલં તદાહ્લાદસન્નામગાનપ્રસન્નમ્ ।
કૃતાઞ્જલ્યતિપ્રેષ્ઠનામપ્રલીનં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૬॥

ગુરુત્યાગરાજેન્દ્રશિષ્યોપગીતં સુપુષ્પોપહારં સુભક્તિપ્રણીતમ્ ।
મનોજસ્તુતિસ્ફૂર્તિપુષ્પાર્ચિતં તં સદાત્રાણભક્તં નમામ્યાઞ્જનેયમ્ ॥ ૧૭॥

ભુજઙ્ગપ્રયાતસ્ફુરદ્ભક્તિગીતં ભુજઙ્ગપ્રયાતપ્રગીતિપ્રમોદમ્ ।
ભુજઙ્ગાવતારાનુજપ્રેષ્ઠભક્તં ભજે મારુતિં તં સભક્તં સુભદ્રમ્ ॥ ૧૮॥

સુભદ્રં વરાનન્દરામાનુરાગં સુભદ્રં સ્વરાનન્દનામાભિગેયમ્ ।
સુભદ્રં વરારામરામોપસેવં સુભદ્રં હનૂમન્તધીરં ભજેહમ્ ॥ ૧૯॥

શ્રીસીતારામભક્તાય રામનામરતાય ચ ।
નામગાનાભિલોલાય આઞ્જનેયાય મઙ્ગલમ્ ॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
આઞ્જનેયભુજઙ્ગપ્રયાતસ્તોત્રં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shrimad Anjaneya BhujangaprayAta stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on February 11, 2023

Please send corrections to *sanskrit@cheerful.com*